# अध्याय : ६ chapter-6

श्री नारद उवाच ।।

इति श्रुत्वा फाल्गुनाहं रोमांच पुलकीकृतः ।।
स्वरूपं प्रकटीकृत्य ब्राह्मणानिदम ब्रवम्[1]।। १

अहो धन्यः[2] पितास्माकं यस्य सृष्टस्य पालकाः ।।
युष्मद्विधा ब्राह्मणेन्द्राः सत्यमाह पुरा हरिः ।। २

मत्तोऽप्यनंतात्परतः परस्मात्समस्त भूताधि पतेर्न किंचित् ।।
तेषां किमुस्यादितरेण येषां द्विजेश्वराणां मम[3]मार्ग वादिनाम् ।। ३

तत्सर्वथाद्य धन्योऽस्मि संप्राप्तं जन्मनः फलम् ।।
यद्भवन्तो मया दृष्टाः पापोपद्रववर्जिताः ।। ४

ततस्ते सहसोत्थाय शातातप पुरागमाः ।।
अर्घ्यपाद्या दिसत्कारैः पूजयामासुर्मां द्विजाः ।। ५

प्रोक्तवन्तश्च मां पार्थ वचः साधुजनो चितम्[4]।।
धन्या वयं ~~[struck]~~ हि देवर्षे त्वमस्मान्यदिहागतः ।। ६

कुतो वाऽगमनं तुभ्यं गन्तव्यं वाक्व सांप्रतम् ।।
अत्राप्यागमने कार्यमुच्यतां मुनिसत्तम् ।। ७

---

१ ब ब्रुवं
२ ब धन
३ अ, ब माग्रवादिनम्
४ अ, ब दितम्

श्रुत्वा प्रीतिकरं वाक्यं द्विजानामिति पांडव ।।
प्रत्यवोचं मुनीन्द्रांस्ताञ्छ्रूयतां द्विजसत्तमाः ।। ८

अहं हि ब्रह्मणो वाक्याद्विप्राणां स्थानकं शुभम्[१] ।।
दातुकामो महातीर्थे महीसागरसंगमे ।। ९

परीक्षन्ब्राह्मणानत्र प्राप्तो यूयं परीक्षिताः[२] ।।
अहं वः स्थापयिष्यामि चानुजानीत द्विजाः ।। १०

एवमुक्तो विलोक्यैव द्विजाञ्छातातपोऽब्रवीत् ।।
देवानामपि दुष्प्राप्यं सत्यं नारद भारतम् ।। ११

किं पुनश्चश्वापि तत्रैव[३] महीसागरसंगमः ।।
यत्र स्नातो महातीर्थफलं सर्वमुपाश्नुते ।। १२

पुनरेको महान्दोषो बिभीमो नीतरां यतः[४] ।।
तत्र चौराः सुबहवो निघृणाः प्रियसाहसाः ।। १३

स्पर्शेषु षोडशं चैकविंशं गृहंलतिनो धनम् ।।
धनेन तेन हीनानां कीदृशं जन्मनो भवेत् ।। १४

---

१ अ शुभं
२ ब परिक्षिताः
३ अ तत्रापि
४ अ, ब यत्रै:

वरं बुभुक्षया वासो मा चौरकरगा वयम् ।।

अर्जुन उवाच ।।

अद्भुतं वर्ण्यते विप्र के हि चौराः प्रकीर्तिताः ।। १५

किंधनं च हरंत्येते येभ्यो बिभ्यति ब्राह्मणाः ।।

नारद उवाच ।।[1]

कामक्रोधादय श्चौरास्तप श्च एव धनं तथा ।। १६

तस्यापहारभीतास्ते मामूचुरिति ब्राह्मणाः ।।

तानहं प्राब्रवं पश्चाद्विजानीत द्विजोत्तमाः ।। १७

[2]जाग्रतां तु मनुष्याणां चौरैः कुर्वंति किं खलाः ।।

भयभीत[3] श्चालसश्च तथा चाशुचिरेव यः ।। १८

तेन किं नाम संसाध्यं भूमिस्तं ग्रस्ते नरम् ।। १९

शातातप उवाच ।।

वयं चौरभयाद्भीतास्ते हरंति धनं महत् ।।

कर्तुं तदा कथं शक्यमंग जागरणं तथा ।। २०

खलाश्चौरा गताः क्वापि तत्रो नत्वाऽऽगता वयम् ।।

तस्मात्सर्वं संत्यजामो भयभीता वयं मुने ।। २१

---

१ ब श्री नारद उ० ।।

२ अ प्रतौ "तपस्विनां मनुष्याणां" इतिस्यात् ।

३ ब भीता

प्रतिग्रहश्च वै घोरः षष्ठांशफलदस्तथा ।।
एवं ब्रुवति तस्मिंश्च हारीतोनाम चा ब्रवीत् ।। २२

मूढबुद्धया हि[१] को नाम महीसागरसंगमम् ।।
त्यजेच्च यत्र मोक्षश्च स्वर्गश्च करगोऽथ वा[२]।। २३

कलापादिषु ग्रामेषु को वसेत विचक्षणः ।।
यदि वासः स्तम्भतीर्थे क्षणार्धमपि लभ्यते ।। २४

भयं च चौरजं सर्वं किं करिष्यति तत्र नः ।।
कुमारनाथं मनसि पालकं कुर्वतां दृढम् ।। २५

साहसं च विना भूतिर्न कथंचन प्राप्यते[३] ।।
तस्मान्नारद तत्राहमा यास्ये तव वाक्यतः ।। २६

षड्विंशति सहस्त्राणि ब्राह्मणा मे परिग्रहे ।।
षट्कर्मनिरताः शुद्धा लोभदम्भ विवर्जिताः ।। २७

तैः सार्धमागमिष्यामि ममेदं मतमुत्तमम् ।।
इत्युक्ते वचनं तांश्च कृत्वाहं दंडमूर्धनि ।। २८

---

१ अ प्रतौ "को हि " इति स्यात् ।
२ अ करगो यथा ।। ब करगौ तथा ।
३ ब लभ्यते ।

निवृत्तः सहसा पार्थ खेचरीऽति मुद्रान्वितः ।।
शतयोजनमात्रं तु हिममार्गमतीत्य च ।। २९

केदारं समुपायातो मुक्तस्तैः द्विजस्तमैः ।।
आकाशेन सुशक्यश्चैव बिलेनाथ स देशकः ।। ३०

अतिक्रांतु[१] नान्यथा च तथा स्कंद प्रसादतः ।। ३१

अर्जुन उवाच ।।
क्व कलापं च तद्ग्रामं कथं शक्यं बिलेन च ।।
कथं स्कंदप्रसादः स्यादेतन्मे ब्रूहि नारद ।। ३२

नारद उवाच ।।
केदाराद्धिम संयुक्तं योजनानां शतं स्मृतम् ।।
तदंते योजनशतं विस्तृतं तत्कलापकम् ।। ३३

तदंते योजनशतं वालुकार्णवमुच्यते ।।
शतयोजनमात्रः स भूमि[२]ः स्वर्गस्ततः स्मृतः[३] ।। ३८

बिलेन च यथा शक्यं गंतुं तत्र शृणुष्व तत् ।।
निरन्नं वै निरुदकं देवमाराधयऽद्गुहम् ।। ३५

---

१ अ अतिक्रांतो
२ अ, ब भूमिः
३ अ, ब स्मृताः

दक्षिणायां दिशि ततो निष्पापं मन्यते यदा ।।
तदा गुहो ऽस्य दिशति स्वप्ने गच्छेति[1] भारतः ।। ३६

ततो गुहात्पश्चिमतो बिलमस्ति बृहत्तरम् ।।
तत्र प्रविश्य गंतव्यं क्रमाणां शतसप्तकम् ।। ३७

तत्र मारकतं लिंगमस्ति सूर्यसमप्रभम् ।।
तदग्रे मृत्तिका चास्ति स्वर्णवर्णा सुनिर्मला[2] ।। ३८

नमस्कृत्य च तल्लिंगं गृहीत्वा मृत्तिकां च ताम् ।।
आगंतव्यं स्तंभतीर्थे समाराध्य कुमारकम् ।। ३९

कौलं वा कूपतो ग्राह्यं भूतायं निशि तज्जलम् ।।
तेनोदकेन मृत्तिकया कृत्वा नेत्रद्वयाञ्जनम् ।। ४०

उद्वर्तनं च देहस्य कदाचिच्चत्वाष्टिमे पदे ।।
नेत्रांजन प्रभावाच्च बिलं[3] पश्यति शोभनम् ।। ४१

तन्मध्येन[4] ततो याति गात्रोद्वर्ते प्रभावतः ।।
कारीषैर्नर्मि चात्युग्रैर्भक्ष्यते नैव कीटकैः ।। ४२

---

१ ब ब गच्छेत
२ अ सुनिश्चला ब सुनिर्मल
३ अ बलिं ब बलं
४ ब तेन मध्येन

बिलमध्ये च संपश्यन्सिद्धान्भास्कर‿सन्निमान्[१] ।।
यात्यैवं यात्यसौ पार्थ कलापं ग्राममुत्तमम् ।। ४३

तत्र वर्षसहस्त्राणि चत्वार्यग्रिः प्रकीर्तितम्[२] ।।
फलानां भोजनं च स्यात्पुनः पुण्यं च नाज्जयेत् ।। ४४

इत्येतत्कथितं तुभ्यमतश्रुत्वा भूच्छृणुष्वं तत् ।।
तपः[३] सामर्थ्यतः सूक्ष्मान्दण्डस्याग्रे निधायतान् ।। ४५

द्विजानहं समायातो महीसागर‿संगमम्[४] ।। ४६

तदोत्तार्थ मया मुक्तास्तीरे पुण्यजलाशये ।।
ततो मयाकृतं स्नानं सह तैर्द्विजसत्तमैः ।। ४७

निःशेषा दोषादावागुनी महीसागर‿संगमे ।।
पितृणां देवतानां च कृत्वा तर्पणासत्क्रियाः ।। ४८

जपमानाः किं परं जप्यं त्रिविष्टाः संगमेवयम् ।।
भास्करं समवेक्षं तश्चिन्तयंतो हरिंत्दर्कदि ।। ४९

---

१ अ सप्रभान्

२ ब प्रकीर्तितां

३ ब ततः

४ According to the MSS 'A' the chapter is finished with the words -
-इति श्री स्कंदपुराणे कुमारिका खंडे ब्राह्मण नयनं ।
The New chapter begins with the words -
"नारद उवाच" ।

तस्मिंश्चैवांतरे पार्थ देवाः शक्रपुरोगमाः ॥
आदित्याद्या ग्रहाः सर्वे लोकपालाश्च संगताः ॥ ५०

देवानां योनयो ह्यष्टौ गंधर्वाप्सरसां गणाः ॥
महोत्सवे ततस्तस्मिन्गीतवादित्र उत्तमे ॥ ५१

पादप्रक्षालनं कर्तुं विप्राणामुद्यतस्त्वहम् ॥
तस्मिन्काले चाशृणुवमहमातिथ्य वाक्यताम् ॥ ५२

सामध्वनि समायुक्तां तृतीयस्वरनादिताम् ॥
अतीव मनसो रम्यां शिवभक्तप्रियोत्तमाम् ॥ ५३

विप्रैरुत्थाय संपृष्टः कस्त्वं विप्रक्व चागतः ॥
किंवा[१] प्रार्थयसे ब्रूहि यत्ते मनसि रोचते[२] ॥ ५४

विप्र उवाच ॥[३]
मुनिः कपिलनामाहं नारदाय निवेद्यताम् ॥
आगतः प्रार्थनायैव तच्छ्रुत्वाहमथा ब्रुवम्[४] ॥ ५५

धन्योहं[५] यदिहायातः कपिलत्वं महामुने ॥
नास्त्य देयं तवास्माभिः पात्रं नास्ति तवाधिकम् ॥ ५६

---

१ ब किंवासा
२ अ वर्तते
३ ब विप्र उ० ॥
४ अ ब्रूवं
५ ब अन्योहं

कपिल उवाच ।।

ब्रह्मपुत्र त्वया देयं यदि मे त्वं शृणुश्व तत् ।।
अष्टौ विप्रसहस्त्राणि मम देहीति नारदं ।। ५७

भूमिदानं करिष्यामि कलापग्रामवासिनाम् ।।
ब्राह्मणानामहं चेष्टां तदिदं क्रियतां विभो[१] ।। ५८

ततो मया प्रतिज्ञातमेवमस्तु महामुने ।।
त्वयापि क्रियतां स्थानं कापिलंकपिलोत्तमम् ।। ५९

श्राद्धे वो प्राप्तकाले वाह्मतिथिर्विमुखो भवेत् ।।
यस्याश्रममुपायातस्तस्य सर्वं हि निष्फलं ।। ६०

स गच्छेद्रौरवाल्लोकान्योऽतिथिं नाभिपूजयते् ।।
अतिथिः पूजितो येन स देवैरपि पूज्यते ।। ६१

दानैर्यज्ञैस्ततस्तस्मिन्भोजितः[२] कपिलो[३] मुनिः ।।
ततो महामुनिः[४] श्रीमान्हारीतो ह्यर्चयितस्तदा ।। ६२

पादप्रक्षालनार्थाय सिद्धदेव समागमे ।।
हारीतश्च पुरस्कृत्य वामपादं तदा स्थितः ।। ६३

---

१ अ। विभो ब चभो

२ ब भाजितः

३ ब कपिला

४ अ, ब मयामुनिः

ततो हासो महाभ्जसे सिद्धाप्सरः सुपर्वणाम् ।।
विचिंत्य बहुधा पृथ्वीं साधु साधु कृताद्विजाः।। ६४

ततो ममापि मनसि शोकवेगो महानभूत् ।।
सत्यां चैव तथा मेने गाथां पूर्वबुधेरिताम् ।। ६५

सर्वेष्वपि च कार्येषु हेतिशब्दो विगर्हितः ।।
कुर्वतामति कार्याणि शिलापातो ध्रुवं भवेत् ।। ६६

ततोहमब्रवं[१] विप्रान्युयं मूर्खा[२] भविष्यथ ।।
धनधान्याल्प संयुक्ता दारिद्र्यकलिलावृताः ।। ६७

एवमुक्ते प्रहस्यैव हारीतः प्राब्रवीदिदम् ।।
तवैवेयं मुने हानिर्यदुस्मा छपते भवान् ।। ६८

कः शापो दीयते तुभ्यं शापोयमयमेव ते ।।
ततो विमृश्य भूयो हमब्रवं[३] किमहं द्विजे ।। ६९

तथाविधस्य भवतो वामपाद प्रह्वनतः[४] ।। ७०

---

१ ब ब्रुवं
२ अ मूर्षा
३ ब ब्रवं
४ अ। प्रह्वनता ब प्रह्वनतः

हारीत उवाच ।।
शृणु[१] तत्कारणं धीमञ्छून्यता मे यतो भवेत्[२] ।। ७१

इति चिंतयतश्चित्ते हा दुःखोऽयं प्रतिग्रहः ।।
प्रतिग्रहेण विप्राणां ब्राह्मं तेजो हि शाम्यति ।। ७२

महादानं हि गृह्णानो ब्राह्मणः[३] स्वं शुभं हि[४]यत् ।।
ददाति दातुर्दाताच अशुभं यच्छति स्वकम् ।। ७३

दाता प्रतिग्रहीता च वचनं[५] हि परस्परम् ।।
मन्यतेऽधःकरो यस्य सोऽल्पबुद्धिः प्रहीयते ।। ७४

इति चिंतयतो मह्यं शून्यताभूद्धि नारद ।।
निद्रार्तश्च भयार्तश्च कामार्तः शोकपीडितः ।। ७५

त्वदत्स्वश्चान्यचित्तश्च शून्याह्येते भवंति च ।।
तदेषु मतिमान्कोपं न कुर्वीत यदि त्वया ।। ७६

कृतः कोपस्ततस्तुभ्यमेवं हानिरियं मुने ।।
ततस्तापान्वितश्चाहं तान्विप्रानब्रवं पुनः ।। ७७

---

१ ब शृण्वे
२ अ क भवेत्
३ ब ब्राह्मणं
४ ब हितत् ।।
५ अ ब बचनां

धिङ्मामस्तु ह्रं दुर्बुद्धिम‿विमृश्यार्थ‿कारिणम्[1] ॥
कुर्वतामविमृश्यैव तत्किमस्ति न यद्भवेत् ॥ ७८

सहसा न क्रियां कुर्यात्पदमेतन्महापदाम् ॥
विमृश्य‿कारिणं धीरं वृणते सर्वसंपदः ॥ ७९

सत्यमाह महाबुद्धिश्चिरकारी पुरा[2] हि सः ॥
पुरा हि ब्राह्मणःकश्चित् प्रख्यातो गिरसां कुले ॥ ८०

चिरकारी महाप्राज्ञो गौतमस्या[3]भवत्सुतः ॥
कक्कककक्कि कक्कक चिरेण सर्वकार्याणि यो विमृश्य प्रपद्यते ॥ ८१

चिरकार्याभिसंपत्तेश्चिरकारी तथोच्यते ॥
अलसग्रहणं प्राप्तो दुर्मेधावी तथोच्यते ॥ ८२

बुद्धिलाघवयुक्तेन जनेनादीर्घ‿दर्शिना ॥
व्यभिचारेण कस्मिन्स व्यतिक्रम्यापरान्सुतान् ॥ ८३

पित्रोक्तः कुपितेनाथ जहीमां जननीमिति ॥
स तथेति चिरेणोक्तः स्वभावाच्चिरकारकः ॥ ८४

---

१ ब कारणं
२ ब परो
३ अ गौतस्या

विमृश्य चिरकारीत्वाच्चिंतयामास वैचिरम् ।।
पितुराज्ञां कथं कुर्यां न हन्यां मातरं कथम्[१] ।। ८५

कथं धर्मच्छलेनास्मिन्निमज्जेयम साधुवत् ।।
पितुराज्ञा परो धर्मा ह्ययधर्मो मातुरक्षणम्[२] ।। ८६

अस्वतंत्र[३] च[४] पुत्रत्वं किं तुमां आत्र पीडयेत् ।।
स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् ।। ८७

पितरंचाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ।।
अनवज्ञा पितुर्युक्ता[५] मातुश्च रक्षणम् ।। ८८

क्षमायोगृयावुभावेतौ नातिवर्तेत वै कथम् ।।
पिता ह्यात्मानमाधत्ते जायायां बज्ञिवानिति ।। ८९

शीलचारित्र गोत्रस्य धारणार्थं कुलस्य च ।।
सोऽहमात्मा स्वयं पित्रा पुत्रत्वे[६] परिकल्पितः ।। ९०

जातकर्मणि यत्प्राह पिता यच्चोपकर्मणि ।।
पर्याप्तः स दृढीकारः पितुर्गौरवलिप्सया ।। ९१

---

१ ब कथां

२ ब रक्षणां

३-४- ब अस्वत्रं त्वं च

५ अ, ब, युक्ता (प्रत्यो.) "युक्ता" नास्ति । परंतु "पितुःमाताश्च''' ब
इति स्यात् ।

६ ब पुत्रवे

शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ।।
तस्मात्पितुर्वचः कार्यं न विचार्यं कथंचन ।। १२

पातकान्यपि चूर्यंते पितृर्वचनकारिणः ।।
पिता स्वर्गः पिता धर्मः पिता परमकं तपः ।। १३

पितरि प्रीतिमापन्ने सर्वाः प्रीणंति[1] देवताः ।।
आशिषस्ता भजंत्येनं पुरुषं प्राह याः पिता ।। १४

निष्कृतिः सर्वपापानां पिता यदभिनंदति ।।
मुच्यते बंधनात्पुष्पं फलं वृतांत्प्रमुच्यते ।। १५

क्लिश्यन्नपि[2] सुतः स्नेहं[3] पिता स्नेहं न मुंचति ।।
एतद्विचिंत्य तं तावत्पुत्रस्य पितृगौरवम् ।। १६

पिता नाल्पतरं स्थानं चिंतयिष्यामि मातरम् ।।
यो ह्ययं मयि संघातो मर्त्यत्वे पांचभौतिकः ।। १७

अस्य मे जननी हेतुः पावकस्य यथारणिः ।।
माता देहारणिः पुंसः सर्वस्यार्थस्य[4] निवृत्तिः ।। १८

---

१ अ, ब प्रीयंति

२ अ क्लिशन्नपि

३ अ, ब स्नेहैः

४ ब सर्वस्यार्तस्य

मातृलाभे सनाथत्वमनाथत्वं विपर्यये ।।
न स शोचति नाप्येनं स्थावर्यमपि कर्षति ।। ९९

श्रिया हीनोऽपियो गेहे अंबेति प्रतिपद्यते ।।
पुत्रपौत्रसमापन्नो जननीं यः समाश्रितः ।। १००

अपि वर्षशतस्यांते स द्विहायनवच्चरेत् ।।
समर्थं वाऽसमर्थं वा कृशं वाप्यकृशं तथा ।। १०१

रक्षयेच्च सुतं माता नान्यः[1] पोष्यविधानतः ।।
तदा स वृद्धो भवति तदा भवति दुःखितः ।। १०२

तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते[2] ।।
नास्ति मातृसमाच्छाया नास्तिमातृसमा गतिः ।। १०३

नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रपा ।।
कुक्षिसंधारणाद्धात्री जननाज्जननी तथा ।। १०४

अंगानां वर्धनादंबा वीरसूत्वे च वीरसूः ।।
शिशोः शुश्रूषणाच्छ्रुश्रूर्माता स्यान्माननात्तथा ।। १०५

---

१ ब तान्यु
२ अ. ब विमुच्यते ।।

देवतानां समावापमेकत्वं पितरं विदुः ।।
मर्त्यानां देवतानां च पूनो नात्येति मातरम् ।। १०६

पतिता गुरवस्त्याज्या माता च न कथंचन ।।
गर्भधारण पोषाभ्यां तेन माता गरीयसी ।। १०७

एवं स कौशिकीतीरे[1] बलि राजानमीक्षतीम् ।।
स्त्रीवृत्तिं चिरकालं हि चिंतार्त नाभ्यपद्यत ।। १०८
एतस्मिन्नंतरे शक्रो ब्राह्मणं रूपमास्थितः ।। १०९

गायन्गाथामुपाययाश्च पितुस्तस्याश्रमांतिके ।।
अनृता हि स्त्रियः सर्वाः सूत्रकारो यद[2]ब्रवीत् ।। ११०

अतस्ताभ्यः फलं ग्राह्यं न स्यादक्षीक्षणः सुधी ।।
इति श्रुत्वा तमानर्च मेधातिथिरुदारधीः ।। १११

दुःखीतश्चिंतयन्प्राप्तो भृशामश्रुणि वर्तयन् ।।
अहो ऽहमीर्ष्ययाक्षिप्तो मग्नो ऽहं दुःख सागरे[3] ।। ११२

---

१ अ. ब कौशकी तीरे
२ अ यदा
३ अ दुःखित सागरे ।।

हत्वा नारीं च साध्वीं च को मां तारयिष्यति ।।
सत्वरेण मयाज्ञप्तश्चिरकारी ह्युदारधीः ।। ११३

यद्ययं चिरकारी स्यात्स मां त्रायेत पातकात् ।।
चिरकारिक भद्रं ते भद्रं ते चिरकारिक[१] ।। ११४

मदद्य चिरकारीत्वं ततो ऽसि चिरकारिकः ।।
त्राहि मां मातरं चैव तपोयच्चार्जितं मया ।। ११५

आत्मानं पातके विष्टं शुभाह्व चिरकारिक ।।
एवं स[२] दुःखितः[३] प्राप्तो गौतमो ऽचिन्तयत्तदा ।। ११६

चिरकारिकं ददर्शाथ पुत्रं मातुरुपांतिके ।।
चिरकारी तु पितरं दृष्ट्वा परम दुःखितः ।। ११७

शस्त्रं त्यक्त्वा स्थितो मूर्ध्ना प्रसादायोपचक्रमे ।।
मेधातिथिः सुतं दृष्ट्वा शिरसा पतितं भुवि ।। ११८

पत्नीं चैव तु जीवंतीं पराभ्यगमन्मुदम् ।।
हन्यादिति न सा वेद शस्त्रपाणौ स्थिते सुते ।। ११९

---

१ अ का
२ अ सु
३ ब सुदुःखितं
४ ब परं दुःखिताः

बुद्धिरासीत्सुतं दृष्ट्वा पितुश्चरणयोर्नतम् ।।
शस्त्र ग्रहण चापल्यं संवृणोति भयादिति ।। १२०

ततः पित्रा चिरं स्मृत्वा[१] चिरं चाघ्रायमूर्धनि ।।
चिरं दोर्भ्यां परिष्वज्य चिरंजीवेत्युदाहृतः ।। १२१

चिरं मुद्रान्वितः पुत्रं मेधातिथिरथाब्रवीत् ।।
चिरकारिक भद्रंते चिरकारी भवेच्चिरम् ।। १२२

चिराय यत्कृतं सौम्य चिरमस्मिन्न दुःखितः ।।
गाथाश्चाप्य ब्रवीद्विद्वान्गौतमो मुनिसत्तमः ।। १२३

चिरेण मंत्रं[२] संधीयाच्चिरेण च कृतं त्यजेत् ।।
चिरेण विहितं मित्रं चिरं धारणमर्हति ।। १२४

रागे दर्पे च माने च द्रोहे पापे च कर्मणि ।।
अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते[३] ।। १२५

बंधूनां सुहृदांचैव भृत्यानां स्त्रीजनस्य च ।।
अव्यक्तेष्व पराधेषु चिरकारी प्रशस्यते ।। १२६

---

१ ब श्रुत्वा

२ अ मित्रं

३ ओ ब्र प्रशस्यते

चिरं धर्माभ्रिष्येवेत कुर्याच्चान्वेषणं चिरम् ।।
चिरमन्वास्य विदुषाश्चिरमिष्टानुपास्य च ।। १२७

चिरं विनीय चात्मानं चिरं यात्यनवज्ञताम् ।।
ब्रुवतश्च[1] परस्यापि वाक्यं धर्मोपसंहितम् ।। १२८

चिरं पृच्छेच्चशृणुयाच्चिरं न परिभूयते ।।
धर्मे शस्त्री शस्त्रहस्ते पात्रे च निकटस्थिते ।। १२९

भये च साधुपूजायां चिरकारी न शस्यते ।।
एवमुक्त्वा पुत्रभार्या सहितः[2] प्राप्य चाश्रमम् ।। १३०

ततश्चिरमुपास्याथ दिवं यातश्चिरं मुनिः ।।
वयं त्वेवं ब्रुवन्तोऽपि मोहनैवं प्रतारिताः[3] ।। १३१

कलौ च भवतां विप्रा मच्छायो निपतिष्यति ।।
केचित्सदा भविष्यंति विप्राः सर्वगुणैर्युताः ।। १३२

पाद प्रक्षालनं कृत्वा ततोऽहं धर्मवर्मणः[4] ।।
समीपे साक्षिणो देवान्कृत्वा संकल्पमाचरम् ।। १३३

---

१ अ ब्रूवतस्य
२ ब सहित
३ अ प्रकारिताः
४ ब प्रतौ "धर्मवर्मणः" नास्ति ।

कांचनैर्गोप्रदानैश्च गृहदानैर्धनादिभिः ।।
भार्याभूषणवस्त्रैश्च कृतार्था ब्राह्मणाः कृताः ।। १३४

ततः करं समुद्यम्य प्राहेन्द्री देवसंगमे ।।
हरांगरुद्धवामार्द्धा यावद्देवी गिरेः सुता[1] ।। १३५

गणाधीशो वयं यावद्यावत्त्रिभुवनंत्त्विदम् ।।
तावन्नन्द्यादिदं स्थानं नारदस्थापितं सुराः ।। १३६

[2]ब्रह्मशापो रुद्रशापो विष्णुशापस्तथैव च ।।
द्विजशापस्तथा भूयादिदं स्थानं विलुंपतः ।। १३७

ततस्थेति तैः सर्वैर्हृष्टैस्तत्र तथोदितम् ।।
एवं मया स्थापिते स्थानकेऽस्मिन्संस्थापयामास च कापिलं मुनिः।।
स्थाने उभे देवकृते प्रसन्नास्ततो यर्युर्देवता देवसद्म ।। १३८

३. इति श्री स्कांदे ... ... ... नारदीयस्थानप्रतिष्ठा वर्णनंनाम षाष्ठोऽध्यायः ।।

---

१ ब सुताः
२ अ प्रतौ "ब्रह्मशापो विष्णुशापो रुदशापो" इतिस्यात् ।
३ अ - इति श्री स्कंदपुराणे कुमारिकाखंडे नारदीयस्थान प्रतिष्ठा नामाध्यायः ।।
ब इति श्री स्कंदपुराणे कुमारिकाखंडे नारदीयस्थान प्रतिष्ठा षाष्ठोध्यायः ।।